ध्यकेप्रतियोग्यसामानाधिकरण्याघटितैवव्याप्तिरुक्तानोपादेयंचेत्सादिनेतितदपिनसाध्यसामानाधिकरण्यविशेषणीभू
तसाध्याभावेसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशप्रयोजनाभावाद्व्याप्यवृत्तिसाध्यकेपिसंबंधांतरावच्छि
न्नसाध्याभावएवसाध्यसामानाधिकरण्यप्रसिध्यातत्राप्युक्तव्याप्तिप्रसिद्धेरितुननुप्रतियोग्यसामानाधिकरण्यगर्भव्याप्तेः
अनुमितिप्रयोजकत्वेप्रतियोग्यसामानाधिकरण्यानुपस्थितिरशायांतदसामानाधिकरण्यविषयकस्यैवहेतुसमानाधिक
रणाभावप्रतियोगित्वज्ञानादनुमितिरुपपद्यतेइत्यनुपपन्नमितिचेदाहनोपादेयंचेति व्याप्यवृत्तिसाध्यकेऽनुमितिपूर्वंअ
व्याप्यवृत्तित्वज्ञानाविषयसाध्यकेसर्वथैवप्रतियोगिवैयधिकरण्यंनोपादेयंअनुमितिप्रयोजकव्याप्तिशरीरेनिवेशनीयं।
तत्रतदटितव्याप्तिज्ञानमेवहेतुःसर्वथैवेत्यनेनयत्साध्यकस्थलेकदाचिदनुमितिपूर्वंसाध्येहेतुमत्त्वव्याप्यवृत्तित्वज्ञानंतत्रतद
नुमितिनिर्वाहायप्रतियोग्यसामानाधिकरण्यमुपादायाव्याप्यवृत्त्यनुमितिप्रयोजकत्वमुपेयंवक्ष्यमाणरीत्यानुगमान्नव्याप्तिचारइ

सिधी० ॥२६॥

तिसूचितं। साध्येभेदेसुपलक्षणं।।प्रतियोग्यसामानाधिकरण्यानुपस्थितिदशाभेदेनएकसाध्यकेप्यनुमितिप्रयोजक-व्याप्तिभेदोपगमोपिवोद्द्रव्यरतिव्याचक्रुःव्याप्यवृत्तिसाध्यकस्थलेद्विविधाव्याप्तिर्नीलव्याप्यवृत्तिसाध्येकरतिसाध्यभेदेनव्याप्तिभेदाभावेनसंभवतीसतआहसाध्यादिभेदेनेतिसाध्यतावच्छेदकोदविशेष्यव्याप्तिघटकतयातद्भेदेनद्रव्यावश्यकत्वादिसर्थःयद्यपिजात्यादौगुणकर्मान्यत्वादिसामानाधिकरण्योपलक्षितस्यसत्वादेर्व्याप्तिरस्त्येवगुणादौसदुपलक्षितसत्वाद्यनुमितेःप्रमात्वातथापिगुणादौगुणान्यत्वादिसामानाधिकरण्यविशिष्टसत्तादिप्रतियोगिकवैशिष्ट्यावगाहिन्याअनुमितेभ्रमत्वात्तत्रतादृशानुमित्योपयिकव्याप्तिस्वीकारेसलिंगपरामर्शादपिभ्रमस्यादितितादृशानुमित्योपयिकव्याप्तिर्गुणादिवृत्तिहेतौनस्वीकर्त्तुशक्यतेऽतःसाध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्योपयिकव्याप्तिशरीरंप्रतियोगितावच्छेदकविशिष्टवैय्यधिकरण्यपर्य्यंतंनिवेश्यतत्रतादृशातिव्याप्तिंवारयतिःप्रतियोग्यसामानाधिकरण्यंचेतिः।

नचतत्रापिव्याप्तिस्वीकारेऽतिविरहःगुणेगुणऽन्यत्रविशिष्टसत्तावानित्यादौतादृशव्याप्तिसत्त्वेपिबाधेनैवहेतोदुष्ट
त्वोपपत्तेःद्रव्यपक्षकतादृशसाध्यकजात्यादिहेतोश्चसमीचीनतायाएवोपगमेऽतिविरहात्। बाधानवतारदशायांच्गुण
दौजात्यादिलिंगकविशिष्टसत्ताचैशिष्यानुमितिर्भ्रमरूपाप्रमात्मकसलिंगपरामर्शादपिस्वीक्रियते। अतएवगंधप्रा
गभावावच्छिन्नोघटोगंधवान्पृथिवीत्वादित्यादौबाधानवतारदशायांप्रमात्मकपरामर्शाद्विशिष्टनुयोगिकचैशिष्यावगा
हिनीत्रमानुमितिर्मणिकारेणोपगम्यतइतिवाच्यंभ्रमानुमितिजनकपरामर्शस्यभ्रमत्वसंभवेतदुपादानमावश्यकमि
त्याशयात्तुगंधप्रागभावावच्छिन्नोघटोगंधवान्पृथिवीत्वादित्यादौपरामर्शस्यकथंचिदपिभ्रमत्वासंभवेनागत्या तत्रप्रमा
त्मकपरामर्शाद्मानुमितिस्वीकार्याद्गुणे विशिष्टसत्तावान्जातिमत्त्वादित्यादिविशिष्टप्रतियोगिकचैशिष्यविषयेकानुमिति
स्थलमुपेक्ष्यगंधप्रागभावावच्छिन्नोघटोगंधवानित्यादिविशिष्टानुयोगिकचैशिष्यविषयेकानुमितिस्थलमसिद्ध्यभिचारा

संकीर्णेवाघोदाहरणत्वेनाभिहितवत्तोमणिकृतोप्युक्तस्थलेव्याप्तिर्नास्तीयाशयउत्तीयतेअथविशिष्टनिरूपितएवसमवा
यादिर्विशेष्याविरोधिनोविशिष्टाभावस्यप्रतियोगितावच्छेदकसंबंधःसमवायादेस्तथादंडाद्युपलक्षितपुरुषादिमत्वविरोधितादृ
शपुरुषाद्यभावातदविरोधितद्विशिष्टपुरुषाद्यभाववैलक्षण्यानिर्वाहात्नचतदुपलक्षितपुरुषाद्यभावस्यसघर्मेनप्रतियोगितावच्छेदकः अपितुप्रतियोगितासमानाधिकरणएवप्रतियोगितावच्छेदकस्यैवप्रतियोगिनिवेशेनतादृतादृशस्यैवचोपलक्षणत्वादितितादृशाभावयोर्विशेषइतिवाच्यंउपलक्षणेनदंडादिनाव्यावृत्तप्रतियोगिनिष्ठप्रतियोगितायांपुरुषत्वादेरतिप्रसक्तितयातन्मात्रेतदवच्छेदकतायाःपर्याप्तिसंभवेनदंडादेरपितदवच्छेदककोटावश्यमंतर्भावात्अतएवपुरुषादिमात्रेणतदंडाद्युपलक्षितपुरुषाद्यभावस्यविरोधःतदवच्छिन्नाभावमात्रस्यैवतद्विशिष्टाभावत्वेसत्तान्यपृथिवीसमवेतश्मश्रुमंवायुत्वादिसारो
ग्रंथकृतोक्तदूषणेनातिव्याप्तिरानमपिविरुध्यतेपृथिवीसमवेतत्वविशिष्टाभावस्यबाध्यादौसत्वेनवायुत्वादेस्तत्रसाध्येसद्वैतु

त्वात्तथात्वप्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्याविवक्षायामपि नातिव्याप्तिः प्रतियोगितावच्छेदकत्वावच्छिन्नसंबंधे नगुणादिर्विशिष्टसत्तानधिकरणत्वादितिचेन्न विशिष्टनिरूपितसंबंधस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्वत्रनसंभवतीतिप्रागुक्तत्वात् अगत्याविशिष्टाभावप्रतियोगिताविशेषणांतर्भावेनपर्य्याप्तासाउपलक्षिताभावप्रतियोगितातुदंडादिरूपावच्छेदकोपलक्षितविशेष्यएवपर्य्याप्तियुपगंमयतयोर्विशेषस्योपपादनीयत्वात् विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावः सहतत्त्वएवप्रतियोग्यसमानाधिकरणश्चयुभयसाध्यकानुसरणंनातिप्रसंगश्चेतिहेतुमतिजनकपरामर्शस्यप्रमात्वप्रसंगश्चयर्थः व्याप्यवृत्तिसाध्यकेपिप्रतियोगिव्यधिकरणयावगाहिपरामर्शस्यानुमितिहेतुतयाउक्तसाध्यस्य व्याप्यवृत्तित्वेपि नातिप्रसंगाप्रसक्तिः ननुमूर्त्तत्वादिहेतौमूर्त्तत्वादिर्विशिष्टमूर्त्तत्वादिरूपतदुभयत्वावच्छिन्नस्यैवव्यापित्वंनतुतदुभयवृत्तिबुद्धिविशेषविषयत्वरूपतदुभयत्वावच्छिन्नस्यतथात्वविशिष्टातिरिक्ततामतेविशिष्टसत्तादिसाध्यकजात्यादिहेतावितिचेन्न

भयसाध्यकमूर्त्तत्वादिहेतावपियथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षेनातिव्याप्तिप्रसक्तिरियमिमांनन्वेया
दिनानिराकरोतिनन्चितिसहजतएवप्रतियोगिपदस्यतत्तावच्छेदकविशिष्टपरतांविनैवउभयत्वंउभयव्यवहारविषयतो
च्छेदकंनविशिष्टत्वात्तूएकविशिष्टापरत्वात्अननतिरिक्तंअभिन्नेअतिरिक्तमिसनुक्तानोननतिरिक्तमियभिन्नमिधा
नंउभयपदार्थतावच्छेदकत्वावच्छेदेनातिरिक्तत्वलाभायनत्तूपदस्थानुयोगितावच्छेदकावच्छेदेनाभाववोधकत्वव्युत्पत्तेः
तावताएकविशिष्टापरत्वमुभयनिष्ठयासज्यवृत्तिधर्मश्चउभयपदार्थतावच्छेदकमस्तुप्रकृतेचउभयत्वमेकविशिष्टापरत्वमेवेति
शंकाव्युदासःअत्रहेतुर्वैशिष्ट्यविरहेपिघटत्वपटत्वयोरुभयत्वस्यप्रसक्तसिद्धत्वादितिघटत्वपटत्वयोःसामानाधिकरण्यविरहे
पितत्रोभयव्यवहारविषयतावच्छेदकस्यप्रसक्तसिद्धत्वादिसर्थःअन्यथातत्रोभयव्यवहारानुपपत्तेरितिभावःयद्यपिघटत्व
पटत्वोभयमितिप्रतीतौकालिकसंबंधघटितसामानाधिकरण्यरूपवैशिष्ट्यंविषयतासंभवस्तथापिवाच्यत्वघटत्वोभयं समवेत
मित्यादिप्रतीतिव्यवहारविरहेणउभयसमवेतमितिप्रतीतिव्यवहारयोःसमवायिसमवेतत्वरूपवैशिष्ट्यविषयतामाअभ्युपगं

तत्र्यतयाघटत्वपटत्वोभयंसमवेतमिसादौतादृशवैशिष्ट्याप्रसिध्याव्यासज्यवृत्तिधर्मएवविषयइतिभावः तथाचतदनुरोधे
नव्यासज्यवृत्तिधर्मविशेषस्योभयवेवहारविषयतायाअवश्यकत्वेएकविशिष्टपरत्वस्यतत्रअवहारविषयत्वमप्रा
माणिकमितिनभूतत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादिसाद्यावेकविशिष्टपरत्वस्यसाध्यतावच्छेदकत्वप्रसक्तिरतथासत्य
नुमितेरुभयवान्इत्याकारकतानुपपत्तेरितिनिर्व्यूढंननुमूर्त्तत्वाधिकरणेमनसिभूतत्वमूर्त्तत्वोभयंनास्तिइति
बुद्धेरेकविशिष्टपराभावावलंबेनेनेवोपपत्तिःमनसिप्रतियोगिसत्वेनोभयवृत्तिधर्मावच्छिन्नाभावासत्वादिति
क्वचिदेकविशिष्टपरत्वस्यापिउभयव्यवहारविषयतावच्छेदकत्वमावश्यकमितिसतआहनवेतितद्वच्छिन्नाभावः प्रसे
काधिकरणवृत्तिरुभयवेवहारविषयतावच्छेदकावच्छिन्नाभावःतद्वच्छिन्नभावात्एकविशिष्टपरत्वावच्छिन्नाभावा
तूनअनतिरिक्तइतिविपरिणतेनसंबंधःप्रतियोगितावच्छेदकविशिष्टेनेवप्रतियोगिताअभावस्यविरोधादेक
स्याधिकरणेपिव्यासज्यवृत्तिधर्मावच्छिन्नाभावसत्वेबाधकाभावादितिभावःएतेनमूर्त्तत्वस्यव्यासज्यवृत्त्युभय

त्वावच्छिन्नव्यभिचारितापि व्यवस्थापिताऽऽवश्यकश्चैकाधिकरणेव्याप्यवृत्तिधर्मावच्छिन्नतदभावःअन्य
थासमवायघटितसामान्याधिकरण्येनघटत्वादिविशिष्टपटत्वाद्यप्रसिध्याघटादौसमवायेनघटत्वपटत्वोभयं
नास्तीतिप्रतीतेरनुपपत्तेस्तत्रसमवायिसमवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैवविषयतायाःस्वीकरणीयत्वात्
अन्यथाएककालीनत्वादिरूपवैशिष्ट्यावच्छिन्नस्यघटत्वादेःसमवायेनघटादौसत्वेनतादृशप्रतीत्यनिर्वाहादित्या
हुश्चैशिष्ट्याविरहेपिघटत्वपटत्वयोरुभयत्वेनअभावस्यप्रत्यक्षसिद्धत्वादिति ननुतथापिव्याप्यवृत्तिनिरुक्तोभय
त्वेनसाध्यत्वेनमूर्त्तत्वस्यव्यभिचारितासंभवतिएकप्रतियोगिमत्यपिअभावस्यप्रतियोगिव्यधिकरणस्यैवसाध्याभाव
स्यव्यभिचारित्वात्व्यभिचारलक्षणेपिप्रतियोगितावच्छेदकावच्छिन्नवैय्यधिकरण्यपर्य्यंतस्यानिवेशादित्याशंक्यां-
निरस्यतिनचतत्रेयादिनाव्याप्तिरेवव्याप्तिरिष्टैवतथात्वेपीतिमूर्त्तत्वस्यमनआसत्वेपियर्थउभयत्वेनेतिउभयत्वि

शिष्टवत्तायामनस्यसत्वादित्यर्थः तथाच तत्रोभयत्वविशिष्टवैशिष्ट्यविषयकानुमितेर्भ्रमत्वात्तस्ययोजकहेतोर्नसि
द्धेरनुत्वस्वीकारसंभवः अतएव व्यभिचारलक्षणेपि प्रतियोगितावच्छेदकावच्छिन्नवैय्याधिकरण्यपर्य्यन्तमेवनिवे
श्यमितिभावः एकाधिकरणेउभयत्वविशिष्टासत्वेमानमाहनात्रोभयमितीतिअत्रोभयमितिप्रतीत्यभावोनहेतु
तयोक्तउभयत्वेनैकस्यसत्वोपगमेउभयत्राधिकरणवृत्तितायास्तादृशप्रतीतिविषयतयाएकस्मिन्नधिकरण
वृत्तित्वाभावेनतादृशप्रतीतेर्भ्रमत्वयावश्यकत्वात्तादृशप्रमाविरहोपपत्तेः ननुप्रतियोग्यसामानाधिकरण्यस्याभावविशेष
णत्वेलक्ष्णेयंतपदवैय्यर्थंधूमाद्यधिकरणनिष्ठवन्ह्यादिभेदस्यप्रतियोगिसमानाधिकरणत्वेनैवसाध्यतावच्छेदकस्यतत्प्र
तियोगितावच्छेदकतायाअकिंचित्करत्वादित्याशंक्यसोप्रदायिकोपदर्शितमसंतपदप्रयोजनमाहासंतपदंचेतिअयंताभाव
त्वनिरूपकप्रतियोग्यसामानाधिकरण्यंस्येतिलाभायेयग्रिमेणान्वयः स्वंयस्यप्रतियोगिनोअसंतोभावस्तादृशप्रतियोग्यसामा
नाधिकरण्यपर्य्यन्तस्याभावविशेषणत्वलाभायेयर्थः अयंताभावत्वनिरूपकप्रतियोगितायाश्चप्रतियोगितानवच्छेदकेसत्र

सिधां०
११३०११

याप्रतियोगितानिविष्टात्तत्रायंताभावत्वरूपानुयोगितानिरूपकत्वविशेषणस्यलाभायेयर्थः क्रमेणव्यावृत्तिमाह अन्ययेति
सर्वस्यैवाभावस्येतिहेतुसमानाधिकरणाभावत्वेनोपादेयस्यसर्वस्यगोत्वाद्यभावस्येयर्थः स्वसमानाधिकरणाभावांतरस्यं
न्नात्स्वंयस्यसमानाधिकरणंतादृशघटत्वाभावभेदवत्वादियर्थः सरूपानतिरिक्तत्वात्गोत्वाद्यभावरूपाधिकरणस्व
रूपत्वादभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणभूताभावस्वरूपेतिसिद्धांताद्दितिभावः प्रतियोग्यसमा
नाधिकरणाभावस्यदुर्लभत्वापत्तेरितिगोत्वाद्यभावानामयंताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेपि
स्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावप्रतियोगिसमानाधिकरणत्वनियमादितिभावः प्रतियोगितावछेदकसंबंधेनप्रति
योग्यसामानाधिकरण्यनिवेशासर्वत्रनतादृशाभावाप्रसिद्धिः किंतुविशेषणतविशेषणसाध्यतास्थलेतन्मतेऽभावेसा
ध्यतावछेदकसंबंधावछिन्नप्रतियोगिताकत्वस्यनिवेश्यत्वात्साध्यतावछेदकसंबंधस्यतत्रनिवेशेपितत्रैवतदप्रसिद्धिर्द्रष्टव्या

गदा॰ ॥३१॥

अयंताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेपिसर्वेषामेवाभावानांकिंचित्विशिष्टस्वाभावादिरूपायंताभावत्वनि
रूपकप्रतियोगिसामानाधिकरण्यनियमात्तदसमानाधिकरणाभावाप्रसिद्धेःयादृशप्रतियोगितेसादिनावक्ष्यमाणरीतेरनु
सरणेप्रतियोगिन्यत्यंताभावत्वनिरूपकत्वनिवेशवैय्यर्थ्यमंत्रास्वरसवीजमेवहेतुसमानाधिकरणेतिहेतुसमानाधिकरणस्य
भेदत्वनिरूपकाभावांतररूपप्रतियोगिसमानाधिकरणत्वेपिविवक्षितायंताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवा
न्गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्यतन्निष्ठस्वभेदात्मकस्यतस्यप्रतियोगित्वादित्यर्थःअभावसाध्यकेतिघटत्वाभा
वादिसाध्यकपटत्वादिसाधनेत्यर्थःअयंताभावत्वनिरूपकप्रतियोगितानिवेशेपिसंबंधांतरावच्छिन्नसाध्यायंताभावप्रतियोगि
तावारणायसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशश्चोक्तएतद्विशेषणमनर्थकंसाध्यतावच्छेदकसंबंधेनप्रतियोग्यसामानाधिक
रण्यस्यापिसत्वेनप्रकृतप्रतियोगितावदसामानाधिकरण्यस्यैवनिवेशनीयतयासाध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्यस्या
~~पिसत्वेनप्रकृतप्रतियोगितावद्~~ सद्वृत्वधिकरणवृत्तित्वविशिष्टाभावेऽसत्वेनाव्याप्यप्रसक्तेरियंस्वरसवीजंसंग्रहायानुमतायंता

सिधां॰ ॥३१॥

भावत्वनिरूपकप्रतियोगितानिवेशपक्षेऽतिव्याप्तिमाशंक्यतेअथेत्यादिनापदार्थोत्वमितिकालिकसंबंधेनगोगोत्वयोर्हेतुसाध्यत्वलाभायगोमानयंगोत्वादितिप्रतिज्ञाहेतुअनभिधापंकालिकसंबंधावच्छिन्नवृत्तिबोधकदाप्रत्ययघटितोदाहरणाभिधानेएवमग्रेपिप्रलयस्येतिचयमिचारनिरूपकहेत्वधिकरणस्थेत्यादिःध्वंसत्वेनाभ्यंताभावानधिकरणत्वादितिप्राचामनुमतंध्वंसप्रागभावयोरभ्यंताभावविरोधिलमादायएतदेवाग्रेनिराकृत्यसमाधत्तेअथकालिकसंबंधेनध्वंसादिमत्यपिकालेऽभ्यंताभाववृत्तावविरोधःमहाकालौसमवायादिसंबंधेनरूपाद्यभ्यंताभावस्यसर्वानुमतत्वात्ननुकालिकसंबंधावच्छिन्नवाभ्यंताभावस्यतत्संबंधावच्छिन्नगोध्वंसाद्यभ्यंताभावरूपतायाअभ्यंताभावस्यत्रितयप्रतियोगिकत्वमंगीकुर्वाणैःप्राचांनैरूपगमात्कालिकसंबंधरूपप्रतियोगितावच्छेदकसंबंधेनगोध्वंसवतितत्संबंधावच्छिन्नगवाभाववृत्तिर्नतेषामनुमतेतिवाच्यंएवमपिकालिकसंबंधेनप्रतियोगिमत्यपितेनसंबंधेनाभ्यंताभावस्यकालिकसंबंधेनवृत्तावविरोधात्तेनसंबंधेनप्रलयेवर्त्तमानमभ्यंताभावमादायातिव्याप्तिवारणसंभवात्अभावस्यसंबंधविशेषनिवेशेप्रयोजनाभावात्ननुप्रतियोग्यसामानाधिकरण्येनाघटितापिव्याप्तिरनुमित्यौपयिकीतद्विशेषणानुपस्थितिदशायामप्यनुमितेरनुभविकतायावश्यमाणत्वात्तुतत्रत्वाभावस्यसंबंधविशेषोऽवश्यमेवप्रवेश्यःअन्यथाहेतुमतिकालिकादिसंबंधेनवर्त्तमा

नंसाध्याभावमादायाव्याप्तेरितितादृशव्याप्तेरेवोक्तस्थलेप्रमात्वप्रसंगपरायंग्रंथइतिवाच्यंयत्रहेतुमति साध्याभावःकालिक संबंधेनवर्त्ततेतत्रप्रतियोग्यसामानाधिकरण्यघटितव्याप्त्यैवसद्धेतुतानिर्वाहात्प्रतियोग्यसामानाधिकरण्यागर्भव्याप्तिग्रह स्यचात्रमत्वोपगमेक्षतिविरहात्तादृशव्याप्तावप्यभावस्यसंबंधविशेषाप्रवेशात्मैवंप्रतियोग्यसामानाधिकरण्यानुपस्थितिदशायां सत्तावानूद्रव्यत्वादित्यादावप्यभ्रांतस्यानुमितिरनुभवसिद्धातदनुरोधेनभावसाध्यकैरैशिकविशेषणतावशेषणहेतुमद्वृत्तित्व गर्भायाअपिव्याप्तेरनुमितिप्रयोजकतावाच्यातथासतितादृशव्याप्तिग्रमामादायोक्तस्थलेऽनुमितिप्रसंगपरतयाएतःग्रंथ स्यसामंजस्यात्नचैवंप्रतियोग्यसामानाधिकरण्यगर्भव्याप्तेरभावस्यसंबंधविशेषानिवेशादभावीयसंबंधविशेषागर्भ प्रतियोग्यसामानाधिकरण्यगर्भव्याप्तिचारग्रहविरोधित्वेनैवप्रतियोग्यसामानाधिकरण्यगर्भतदगर्भव्याप्तीअनुगमप्यतयो रेवानुमितौउपयोगितानिर्वाहइतिवाच्यंतादृशव्याप्तिसंग्रहायैवाभावीयसंबंधविशेषघटितप्रतियोग्यसामानाधिकरण्यघ टितव्याप्तिचारग्रहविरोधित्वेनव्याप्तीनामनुगमनीयत्वात्तावताप्यभावीयसंबंधविशेषाघटितप्रतियोग्यसामानाधिकरण्य

घटितव्याप्तेः संग्रहसंभवात्। एवंसत्यव्यावर्त्तकाभावीयसंबंधघटितप्रतियोग्यसामानाधिकरण्यघटितव्याप्तिज्ञानादप्यनुमितिः स्यादितिचेदिष्टमेवतत्। एवंसतिप्रतियोग्यसामानाधिकरण्यगर्भाभावीयसंबंधविशेषघटितव्याप्तिप्रमातोप्युक्तस्थले ऽनुमितिप्रसंगोदुर्वारइतित्वेतूक्तिरस्माकंवस्तुतस्तुदीधितिकृतासवयंनिष्कर्षणीयहेतुमतिप्रतियोग्यनधिकरणत्वनिवेशकल्पेप्रतियोगिव्यधिकरणत्वघटितव्याप्तावभावीयसंबंधविशेषनिवेशस्यनिष्प्रयोजनत्वेपिप्रतियोग्यनधिकरणत्वैकनिष्ठत्वविशिष्टस्यहेतुमद्वृत्तित्वविशिष्टस्यापिसंयोगाद्यभावस्यकालिकसंबंधेनहेत्वधिकरणकालवृत्तितयाऽव्याप्तिप्रसंगात्एकसंबंधेनैकाधिकरणवृत्तित्वविशिष्टस्याप्यन्यसंबंधेनाधिकरणांतरवृत्तित्वात्प्रतियोगिसामानाधिकरण्याभावनिवेशकल्पेपिगुणादौतद्विशिष्टस्यसंयोगाद्यभावस्यकालिकसंबंधेनकालवृत्तित्वात्तत्कल्प्येव्याप्तेरावश्यकत्वात्नचप्रतियोगिसामानाधिकरण्यविशिष्टस्यतस्यकालवृत्तित्वेप्रतियोगिसामानाधिकरण्याभावविशिष्टस्यनतद्वृत्तित्वसंभवःभावाभावविशिष्टस्यैकाधिकरणवृत्तित्वेप्रतियोगिसामानाधिकरण्याभावविशिष्टसंयोगाद्यभावस्यदेशिकविशेषणतयापिद्रव्यवृत्तित्वप्रसंगादिति

गदा०

॥३३॥

वाच्यंविरोधिनोर्भावाभावयोःकालिकसंबंधेनैकाधिकरणवृत्तितावत्भावाभावविशिष्टस्यापिकालिकसंबंधेनैकत्रवृत्तौवि
रोधाभावात्यद्यप्यभावस्यदेशिकविशेषणतासंबंधनिवेशेसमवायसंबंधावच्छिन्नजायभावसाध्यकेजातित्वादिहेतावव्याप्ति
जायास्विरूपहेतुमत्तितादृशसमवायसंबंधेनवृत्तेरप्रसिद्धेःतथापिसाध्यनिरूपितप्रतियोगितावच्छेदकसंबंधातिरिक्तसं
बंधेनयासाध्याभावस्यवृत्तिस्तदन्यहेतुमद्वृत्तेःप्रकृतप्रतियोगितानिरूपितानुयोगितावच्छेदकसंबंधेनहेतुमतिवृत्तेर्वीअभा
वविशेषणत्वोपगमान्नदोषःतुल्यकालेहेतुमतिकालेकालविशेषवृत्तित्वविशिष्टनित्यस्यायैताभावप्रसिद्धातिव्याप्तिसंगतिः
अयंताभावतघटकनित्यतारूपसाध्यंध्वंससाधारणसंसर्गाभावत्वनिवेशेमहाप्रलयगोत्वरूपसामान्यधर्मावच्छिन्नप्रति
योगिताकध्वंसोपगंतृमतेध्वंसमादायोक्तस्थलातिव्याप्तिःशक्यतेवारयितुमियाशंक्याहसंसर्गाभावेतिदेशिकविशेषणत
यापिध्वंसस्यकालवृत्तित्वमिमाशयेनोक्तरीकासंगतिःअन्यथाऽभावस्यतादृशसंबंधेनवृत्तिनिवेशोऽयैताभावमिवध्वंसम
प्यादायातिव्याप्तेर्दुर्वारत्वात्नचप्रतियोग्यधिकरणमहाकालेगोध्वंसस्यदेशिकविशेषणतासत्वेपिप्रतियोग्यनधिकरणप्र

॥३३॥

सिद्धा०

लयेतस्या तादृशसंबंधोऽप्रामाणिक इतिवाच्यंयदुपाधिविशिष्टस्यप्रतियोग्यधिकरणत्वंतदन्योपाधिविशिष्टस्यैवमहाकालस्य
तद्भावाधिकरणतयामहाकालस्यदैशिकविशेषणतयाध्वंसयतेप्रलयात्मकोपाधेरपितादृशसंबंधेनतदाधारतायाआव
श्यकत्वात्अन्यथाप्रलयेगौर्नास्तीतिव्यवहारानुपपत्तेःअथवानिष्कर्षणीयप्रतियोगिवैय्यधिकरण्यमकल्पनीयंप्रायेणदृ।त
कल्पेप्रयोजनाभावदभावेवृत्तिविरोधानिवेशात्नत्वाभावेवृत्तिविरोधानिवेशोकालिकसंबंधेनगवायंताभावस्यापिप्रलयवृ
त्तेःसंसर्गाभावमात्रपरतोक्तिविरोधइतिवाच्यंप्रतियोगितावच्छेदकसंबंधेनतत्प्रतियोगिनोध्वंसस्यहेत्वधिकरणेऽबाधात्
गवायंताभावस्यप्रतियोगिव्यधिकरणत्वाभावात्ध्वंसस्यतत्प्रतियोगिनोसंताभावस्यप्रतियोगितावच्छेदकदैशिकविशेष
णतासंबंधेनकालेऽसत्वात्प्रतियोगिवैय्यधिकरण्यंमक्षतमेवयदास्यंदइतिअत्रत्वयभिचारनिरूपकाधिकरणंखंडप्रलयोज
न्यद्रव्यानधिकरणेतस्मिन्द्व्यणुकासत्वात्पुनर्द्व्यणुकोत्पत्त्यनुरोधेनपरमाणूनांस्यंदस्वीकारस्यावश्यकत्वात्।तथाचहेत्वधिकरणे
तत्रद्व्यणुकसामान्यध्वंसप्रागभावयोरसत्वादतिव्याप्तिरितिभावःद्व्यणुकनाशानुगुणक्रियायाउत्तरसंयोगनाश्यायाअधिकरणेचर्

मपरमाणुसंयोगनाशरूपमहाप्रलयपूर्वत्रितीयक्षेणेद्व्यणुकसामान्यध्वंससत्वादत्वापत्तिव्यापिनीकिंचारसहेयतोयदादृष्टमिति।इदा
नत्वमात्रेणसाध्यतायांप्रलयेईश्वरीयज्ञानसत्वादयंसद्धेतुरेवेयतोजन्यमितिनिरसुखाभिषक्तिर्मुक्तिरितिमतेखंडप्रलयेपिमुक्ता
त्मनिजन्यज्ञानसत्वात्सद्धेतुत्वसंभवतीतिअतोदुःखेतिजन्यमात्रेप्रयदृष्टस्यहेतुतयामहाप्रलयाव्यवहितप्राक्क्षेणेपितज्जनकी
भूतस्यादृष्टस्यावश्यकत्वरतितदाजन्यज्ञानत्वंदुःखत्वाद्यवच्छिन्नध्वंसमत्वान्नोपदर्शितस्थलयोरितिव्याप्तिःसंभवतीयतःस्थलांतर
माहेयदातस्येतियदात्मसमवेतादृष्टनमहाप्रलयजनकंसतत्यदेनविवक्षितःव्यभिचारश्चात्रखंडप्रलयेसुषुप्त्यादौचवोध्यःखंड
प्रलयनिष्टद्व्यणुकादिध्वंसस्यद्व्यणुकत्वादिरूपसामान्याधर्मावच्छिन्नप्रतियोगिताकत्वासंभवंव्युत्पादयति नहितितयोःध्वंसप्रा
गभावयोःसामान्याभावत्वमतेपिसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वमतेपिध्वंसप्रागभावयोरर्थेताभावाविरोधित्वमतेनत
योस्तथात्वमियेतत्सूचयितुंमतेपीतिएकविशेषेतिएकविशेषप्रागभाववतिनसामान्यावच्छिन्नध्वंसस्यविशेषांतरध्वंसवति न
सामान्यधर्मावच्छिन्नेप्रागभावस्यसंभवइत्यर्थःअन्यूनानतिरिक्तवृत्तिधर्मस्येवावच्छेदकतयातत्कालीनध्वंसादिप्रतियोगिताश्रू

न्यानागतादिपदार्थसाधारण्यतादृशं प्रतियोगितावच्छेदकत्वासंभवादितिभावः यद्यप्यवं महाप्रलयवृत्तयोपि गोध्वंसाः प्रत्येकमेकैकगोव्यक्तिमात्रवृत्तिप्रत्योगिताकाइति नकस्यापिध्वंसस्य प्रतियोगितायाः समनियतंगोत्वंतथापिचरमध्वंसस्ययावद्गो प्रतियोगिकत्वोपगमेतत्प्रतियोगितावच्छेदकत्वंगोत्वस्यसैभवतीत्यपि प्रायेणसंसर्गाभावत्वनिवेशेपूर्वोक्तस्थलमुपेक्ष्यद्व्यणुकादिसाध्यकस्यंदादिहेतुकस्थलेऽतिव्याप्तिरपिहितावस्तुतस्तुध्वंसप्रागभावयोर्व्यधिकरणप्रतियोगिकत्वविरहाच्चरम गोध्वंसस्यापियावद्गोप्रतियोगिकत्वेनसंभवतीतिध्येयं विरोधिनः प्रतियोगिनोऽधिकरणकालेएवचेदभावोवर्त्ततेतदा सुतरांध्वंसप्रागभाववतीकालेप्रलयादौऽसौवर्त्ततइतिसूचनायप्रतियोगिमतइत्येतिदृष्टांतः विरोधाभावात्बाधका भावानूतथाचहेत्वधिकरणेप्रलयादौगोत्वाद्यवच्छिन्नाभावसत्वान्नोक्तस्थलेऽतिव्याप्तिरितिभावः नन्वप्रलयेगोत्वाद्यवच्छि न्नाभावोऽप्रामाणिकः प्रत्यक्षायोगादनुमानस्याप्रयोजकत्वादितिवाच्यंप्रलयेगौर्नास्तीतिशब्दस्यैवप्रमाणत्वात्न हितादृशवाक्य स्याप्रामाण्येकश्चिदुपपत्तिनचध्वंसादिरेवतत्रनत्रर्थोनार्थीताभावइतिवाच्यं अन्वयितावच्छेदकसमानाधिकरणप्रतियोगिता

कात्वमात्रस्यनत्राप्रतिपादनेतिप्रसंगात्तदवच्छिन्नप्रतियोगिताकाभाववोधकतायाएवतस्यव्युत्पन्नतयाअयंताभावमात्रस्य
सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेमतध्वंसादेर्नत्राप्रतिपादनासंभवात्अन्यथाप्रतियोगिमतितध्वंसप्रागभाववृत्तिचकाले
कालिकसंबंधावच्छिन्नप्रतियोगिताकस्यायंताभावस्यावृत्तौअयंताभावस्यतादृशार्यंताभावस्यकालमात्रावृत्तित्वेतिदेशिकविशे
षणतयेत्यादिःननुध्वंसप्रागभाववतिअयंताभाववृत्तौतस्यतद्विरोधितावत्प्रतियोगिमतितद्व्यात्तस्यप्रतियोग्यविरोधिताव्या
पद्येताविशेषादित्यतआहद्रव्यात्तिएकस्यप्रतियोगिमतःकालस्यदेशाभेदावच्छिन्नंप्रतियोग्यनवच्छेदकदेशावच्छिन्नंतथालंदेशि
कसंबंधेनकालिकसंबंधावच्छिन्नायंताभाववत्वंतथाचप्रयोग्यभावयोरेकावच्छेदेनएकत्रावर्त्तमानत्वंविरोधितंतावतापक्षतमेवे
तिभावःअपरस्यध्वंसाध्यविरोधित्वेअयंताभावस्येतिभावःननुकालेवृत्तौदेशस्यावच्छेदकत्वेकिम्मानमतआहदेशकालस्येवेतियथादे
शदेशिकसंबंधावच्छिन्नाभावस्यवृत्तौकालस्यावच्छेदकत्वमिदानींतत्रगोर्नास्तीत्यादिप्रतीतिवलात्तथाकालेकालिकसंबंधाव
च्छिन्नाभावस्यवृत्तौकालस्यावच्छेदकत्वंतावपिदेशविशेषावच्छेदकत्वस्यावश्यकत्वंतथाविधप्रतीतिबलादेवतादृशप्रतीतेःका

॥३५॥

लावच्छेदेनदेशावृत्तिर्देशावच्छेदेनकालवृत्तिर्वाविषयस्तत्रविनिगमकाभावात्अवच्छेदकत्वाधिकरणत्वयोरुभयोरेवसप्तम्यर्थत्वा
दितिभावःप्रतियोगिमत्यपिकालेगवायंताभावस्यवृत्तौतस्यासमानाधिकरणेतेनवारणात्कथंतमादायोक्तातिव्याप्तिर्वार्यतेइत्य
तआहतच्छून्यंचेतिप्रतियोगिशून्येप्रलयादावतिव्याप्तिरितिभावः तद्भावस्यगवायंताभावस्यप्रतियोगिव्यधिकरणत्वात्प्रतियोगिसामान्याधि
करण्याभावघटितत्वात्सामानाधिकरण्येनाव्याप्यवृत्तितामतएवप्रतियोगिसामानाधिकरण्याभावस्याभावविशेषणत्वात्अन्यथा
संयोगिसत्वादिसादावेवातिव्याप्तिःतस्यव्याप्यवृत्तितापक्षेचप्रतियोग्यनधिकरणवृत्तित्वस्यैवनिवेशनीयतयाप्रलयादिवृत्तिगवा
यंताभावस्यानेनप्रतियोगिसमानाधिकरणत्वेपिलक्षणघटकतायाघातादितिभावःसंसर्गाभावत्वंतदघटितायंताभावत्वयो
र्व्यधिकरणत्वेनानवस्थाभयाशंकतेनचेतिसंसर्गाभावविशेषःसदातनसंसर्गाभावःसंसर्गारोपःतादात्म्यातिरिक्तसंबंधेनप्रति
योग्यारोपःतद्वदन्यावृत्तित्वेतिलाघवहितपूर्वक्षणावच्छेदेनतद्वैतोऽन्यस्मिन्वर्त्ततेयद्यतदन्यत्वेसप्तम्यर्थःतत्रजन्यत्वेषष्ठ्यर्थसप्तमी
नियमांतरस्यविशिष्टधीव्यावृत्तंविशिष्टधीनियामकत्वरूपसंबंधत्वघटकनियमस्यअत्रसंसर्गाभावत्वशरीरेनक्षतिरितितद्वद्

न्यावृत्तित्वरूपनियमस्यैवतत्रप्रवेशनीयत्वादितिभावःस्वमतेनियमानंतर्भावस्यानुपदंवक्ष्यमाणत्वादाहुरित्युक्तंनियमापटितमितिअारोपस्याभावबुद्धिहेतुतायानिर्युक्तिकत्वात्तादात्म्यातिरिक्तसंबंधावछिन्नप्रतियोगिताकाभावत्वस्यैवसंसर्गाभावत्वादितिभावःप्रयोजनविरहइतिसाध्यतावछेदकसंबंधेनयादृशप्रतियोगितावछेदकावछिन्नानधिकरणत्वंहेतुमतस्तादृशप्रतियोगितानवछेदकत्वस्यनिवेशनीयतयाअन्योन्याभावत्वादिनिरूपकप्रतियोगितादायदोषाप्रसक्तेरितिभावःप्रतियोगितावछेदकसंबंधेनप्रतियोगिवैय्यधिकरण्यनिवेशकल्पमपित्रेयाहाव्याप्तिश्चेतिनन्मतेसंबंधांतरावछिन्नसाध्याभावमादायदोषवारणायसाध्यतावछेदकसंबंधावछिन्नप्रतियोगितायाएवनिवेशनीयतयातादात्म्यसंबंधेनयत्रसाध्यतातत्रसाध्यतावछेदकसंबंधावछिन्नसंसर्गाभावप्रतियोगित्वाप्रसिद्ध्याअव्याप्तिरप्यापद्यतइत्यर्थः ननुविषयतायावृत्तिनियमकत्वेनप्रतियोगिवैय्यधिकरण्येसंबंधित्वानिवेशान्नातिव्याप्तिरितआहविशेषेतिदिगुपाधीनांदेशेवृत्तावव्छेदकत्वमेवनत्वधिकरणत्वमितिमतेमनसोमूर्त्तत्वेपिनदैशिकविशेषणतयाअधिकरणत्वमितिद्रव्यत्वमात्रस्यहेतुत्वमनोरूपहेत्वधिकरणएवसाध्याभावः

सिद्धा॰ ॥३६॥

प्रतियोगिव्यधिकरणइतिनाति व्याप्तिसंभवस्यतोमतोन्येतिदिक्कालौनेस्वरादतिप्रसिद्ध्येतइतिमतेसद्हेतुरवश्यतःस्खलांतरेतामाहुजा
तीतिसाध्यशून्यानामयीतिसाध्यतावच्छेदकसंबंधेनेयादिः एवंचाधिकरणतथानेसंबधित्वनिवेशोऽन्योन्याभावोपीतितथाचन
तादात्म्यसंबंधेनसाध्यतायामव्याप्तिरितिभावः तद्विशिष्टस्यप्रतियोग्यसामानाधिकरण्यावच्छिन्नस्यतेनेतिकपिसंयोगिएतद्वृ
क्षत्वादित्यादौकपिसंयोगरूपसाध्याभावस्यगुणादौप्रतियोगिसामानाधिकरण्याबच्छिन्नभावत्वेपिहेत्वधिकरणीभूतवृक्षादे
र्नकपिसंयोगसामानाधिकरण्याभावविशिष्टकपिसंयोगाभावत्वंयत्रसामानाधिकरण्यविशिष्टत्वंतत्रदेभावविशिष्टोधिकरण
त्वाप्रत्ययायतूक्तः साध्याभावोनलक्षणघटकइतिनाव्याप्तिरितिभावःहेत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्याभावनि
वेशेनोक्तव्याप्तिवारणस्यसुकरत्वेपिमूलोक्तायतहेतुसामानाधिकरण्यांशनिवेशवैय्यर्थ्यमियानतथाविवक्षितंसार्वभौमेनादृतंप्रतियो
ग्यसामानाधिकरण्यावच्छेदकीभूताधिकरणावच्छिन्नहेतुसामानाधिकरण्यस्यचाभावविशेषणतमुपेक्ष्यस्वरूपाध्यायमतेप्रतियोग्यसमाना
धिकरणतरूपविशेषणेवैशिष्ट्यावच्छेदेनहेतुसामानाधिकरण्यरूपविशेषणेवैशिष्ट्यनिवेशानएवलाघवमियालोक्तंतदनुपपन्नादीधिति
कारेणप्रतियोग्यसामानाधिकरण्यावच्छिन्नहेतुसामानाधिकरण्यंनिवेशितंतथाश्रुतमूललभ्योऽयमेवार्थःप्रतियोग्यसामानाधिकरण्यहे

तुसामानाधिकरण्ययोरुद्देश्यतावच्छेदकविधेयभावस्यविवक्षितत्वादुद्देश्यतावच्छेदकविधेययोरवच्छेद्यावच्छेदकभावलाभस्यचव्युत्पत्तिसिद्धत्वात्॰
प्रतियोग्यसामानाधिकरण्यस्येहतुसामानाधिकरण्यावच्छेदकरूपवत्त्वस्यसत्वादिव्याप्तित्वादितिसार्वभौमोक्तदूषणमेतन्मतेनिरवकाशंतादृश्यो
त्यावनेनपारिभाषिकस्यैवावच्छेदकत्वस्यविवक्षितत्वात्तादृशस्यचतथाविधहेतुतावच्छेदकव्यावृत्तत्वात्॰अन्यथाविषयितासंबंधेनघटत्वावच्छि
न्नस्यज्ञानत्वादिव्याप्यतायादुर्वारत्वात्तादृशसंबंधेनज्ञानत्वादिसामानाधिकरण्येज्ञानविषयतारूपेघटत्वादेरवच्छेदकत्वात्॰नचव्याप्यवृत्तिसाध्यका
व्याप्तिवारणायप्रतियोगिसमानाधिकरणमित्यत्रतरूपप्रतियोग्यसमानाधिकरणत्वमेववनिवेश्यतोकिमुक्तविवक्षयागुणादौप्रतियोगिसामानाधिकर
ण्याभाववत्तोपिकपिसंयोगाभावादेःप्रतियोगिसमानाधिकरणमित्यत्रविरहात्॰भेदस्याव्याप्यवृत्तित्वानुपगमात्॰दूषयतआहतद्वृत्तीतिःप्रतियोगिमद्वृती
यर्थःनार्थःनप्रतियोग्यसमानाधिकरणपदेनविवक्षितःअव्याप्यवृत्तीतिकपिसंयोगीसत्वादिसादाद्यविषयर्थःअतिप्रसंगादितिकपिसंयोगरूपसाध्या
भावस्यद्रव्यादौप्रतियोगिसमानाधिकरणतयातद्भिन्नत्वविरहेणलक्षणघटकत्वादितिभावःअत्रचसामानाधिकरण्यस्याव्याप्यवृत्तितायाःप्राक्स्वयं
दूषितत्वात्॰प्रतियोगिसामानाधिकरण्याभावनिवेशपक्षेप्यतिव्याप्तिवारणमशक्यंद्रव्येतादृशानुपपत्तिमवयद्द्रव्यादिकल्पोत्तरानुसरणबीजतया
व्योवष्टअत्रत्वेतिअसमानाधिकरण्यनिवेशकल्पेत्वर्थःद्रव्यत्वरसादिपक्षेनान्वयःप्रतीतेतसंयोगाभावेगुणेनसंयोगेसामानाधिकरण्यमित्यादिप्रती ॥३७॥
तेःअन्यथागुणादिनिष्ठसामानाधिकरण्यावच्छेदकतायाघटाभावविषयकतयाकपिसंयोगीयेतेत्यादिसादावपिकपिसंयोगादिरूपसाध्याभावस्यप्रतियोगिवै

ऽधिकरण्यावच्छेदकगुणादिवृत्तित्वावच्छिन्नतयालक्षणघटकतैवेयव्याप्यिरत आह। तच्चेतिप्रतियोगिवैय्यधिकरण्येनेत्यर्थः हेत्वधिकरणहेत्वधिकरणनिरूपितैक्येनपृथक्हेतुसामानाधिकरण्येननिवेश्येमेवेतिभावः एवंचहेत्वधिकरणनिरूपितप्रतियोग्यनधिकरणवृत्तित्वमेवाभावविरोधेदेयंनतुतदवच्छेदकावच्छिन्नत्वंअनतिप्रयोजनकत्वात् वृत्तौप्रतियोग्यनधिकरणनिरूपितत्वंहेत्वधिकरणनिरूपितत्वयोर्निवेशापेक्षयातत्रहेत्वधिकरणनिरूपितत्वस्यहेत्वधिकरणत्वप्रतियोग्यनधिकरणत्वस्यनिवेशेचलाघवमित्यालोच्यतथैवनिष्कर्षयति प्रतियोग्यनधिकरणीभूतेतिप्रतियोगितावच्छेदकावच्छिन्नानधिकरणेत्यर्थः तेननदर्शितातिव्याप्तिःयस्यकस्यचिदित्यादिषष्ठ्यंतानांअनधिकरणत्वमित्येनेनान्वयःप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिदनधिकरणत्वंस्वप्रतियोगितावच्छेदकावच्छिन्नाधिकरणप्रतियोगिकभेदमात्रेतत्सामान्यस्यानधिकरणत्वंस्वप्रतियोगितावच्छेदकत्वेनानुगतीकृतप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वावच्छिन्नभेदःप्रतियोगितावच्छेदकंयत्किंचिदितिप्रतियोगितावच्छेदकंतत्तद्व्यक्तित्वेननिवेश्यतदवच्छिन्नाधिकरणत्वावच्छिन्नभेदोवाविवक्षितइत्यर्थः नव्यमतेसंयोगसामान्याभावस्यकेवलान्वयितयातत्रसाध्येसत्तादिःसद्द्रव्यत्वाभाववान्वेतितत्प्रतियोगीतिसंयोगरूपसाध्याभावप्रतियोगित्यर्थः तन्नतूसंयोगत्वावच्छिन्नाभावाभावस्यत्तत्तत्संयोगादेःसंयोगसामान्यानतिरिक्तत्वादि

गदा० ॥३६॥

तिभावःद्रव्यत्वरूपाभावस्यएकव्यक्तिकतयाव्यक्तिविशेषाभावरूपप्रतियोगिसामानाधिकरण्येनघटतेद्रव्यत्वंतस्यस्यकिंचिद्विशिष्ट
स्वाभावरूपप्रतियोगिसामानाधिकरण्यमाहनित्यत्वादीतिआदिनाजन्यत्वादिपरिग्रहः ननुविशिष्टाभावोविशिष्टस्यैवद्रव्यत्वस्यप्रति
योगिनतुशुद्धस्यतस्येतिकथंशुद्धद्रव्यत्वस्यप्रतियोगिवैयधिकरण्यानुपपत्तिरियतआहस्वाभावेतिनचसर्वस्यैवाभावस्यपूर्वक्षणादिवृ
त्तित्वविशिष्टसामावरूपप्रतियोगिसमानाधिकरणतयाप्रतियोगिव्यधिकरणाभावाप्रसिद्धानातिव्याप्तिसंभवइतिवाच्यंप्रतियोगितावछे
दकसंबंधेनप्रतियोगिवैय्यधिकरण्यानिवेशपक्षेऽसंभवस्यसाध्यतावछेदकसंबंधेनहेव्यधिकरण्यनिवेशपक्षेस्वरूपसंबंधावछिन्नसा
ध्यकस्थलेसाध्यतावछेदकसंबंधेनसर्वेषामेवाभावानांप्रतियोगिसमानाधिकरणत्वात्व्याप्यःप्रसक्त्यायसंबंधेनस्वप्रतियोगितावछे
दकावछिन्नानधिकरणत्वंहेतुर्वक्तव्यस्तत्संबंधावछिन्नतदभावीयप्रतियोगितायोसाध्यतावछेदकसंबंधावछिन्नत्वसाध्यतावछेदकधर्मा
वछिन्नत्वोभयाभावएवविवक्षणीयःएवंचोक्तस्थलेस्वरूपसंबंधेनप्रतियोग्यनधिकरणत्वाप्रसिद्धावपिसंयोगादिसंबंधेनघटादयवछिन्न
त्वोभयाभावस्याक्षतत्वात्अतिव्याप्तिरियमिप्रायात्तुकेचित्स्वप्रतियोगिसामान्यानधिकरणहेत्वधिकरणकत्वेनगगनाभावएवतादृश
प्रतियोगिव्यधिकरणःनचस्वप्रतियोगिसामान्योतर्गतनित्यत्वादिविशिष्टगगनाभावाभावरूपप्रतियोग्यधिकरणहेत्वधिकरणकत्वेनतस्य

सिद्धां० ॥३६॥

नतथात्वसंभवइतिवाच्यंनित्यएवनित्यत्वविशिष्टगगनाभावाभावोनास्तीतिप्रयोगात्तत्प्रयोगस्यचनित्येतेनित्यत्वविशिष्टगगनाभावा
भावाभावत्वकल्पनेनैवोपपत्तेर्गगनाभावत्वंतदकल्पनात्नित्यत्वविशिष्टगगनाभावाभावस्यगगनाभावाप्रतियोगित्वादित्याहुस्तन्नत
थापिपूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावरूपप्रतियोग्यधिकरणहेत्वधिकरणकालेनगगनाभावस्यप्रतियोगिव्यधिकरणत्वसंभवात्
पूर्वक्षणवृत्तावपिपूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावो नास्तीतिप्रयोगात्पूर्वक्षणवृत्तित्वभावत्वस्यपूर्वक्षणवृत्तित्वेकल्पयि
तुमशक्यत्वेनगगनाभावानतिरिक्तविशिष्टगगनाभावएवतत्त्वस्यकल्पनीयतयापूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावेगगनाभावप्र
तियोगित्वावश्यकत्वादितिस्वरूपसंबंधेनगगनादेर्वृत्तिमत्तेतुनैषदोषइतिध्येयंआत्मनिसंयोगसामान्याभावस्यसर्वमतसिद्धत्वेवि
शेषतःकपीतिजन्यइच्छावृत्तिहेतुकेतदधिकरणजन्येच्छेगुणसामान्याभावस्यापिउत्पत्तिकालावच्छेदेनस्वमतेसत्वात्तत्तादृशप्रतियोगित्वे
यधिकरण्येनघटतेअतआत्मत्वहेतुकानुसरणेगुणसामान्याभावत्वस्यकपिसंयोगस्वरूपाभावप्रतियोगितावच्छेदकत्वंस्फुटीकर्त्तुंक
पिसंयोगानांगुणत्वकीर्त्तनंतत्प्रतियोगितावच्छेदकेतितथात्वतादृशाभावोऽपियत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगित्व-
धिकरणएवतत्प्रतियोगितावच्छेदकत्वात्कपिसंयोगाभावत्वस्येपित्यर्थइतिभावःयाहशेतियथायत्प्रतियोगितावच्छेदकावच्छिन्नाधिक

गदा० ॥३९॥

रणत्वावच्छिन्नभेदवत्त्वमित्यर्थः कपिसंयोगिएतत्त्वादिया दौ यत्किंचित्कपिसंयोगादिव्यक्त्यनधिकरणेऽपिहेतुमतः कपिसंयोगत्वावच्छिं
न्नप्रतियोगितावच्छेदकावच्छिन्नाधिकरणसामान्यभेदवत्त्वासंभवात्तत्र तदेनतादृशीप्रतियोगितोयात्तुं नशक्येतरतिनाव्याप्तिः द्रव्यत्वाभा
ववानूसत्त्वादिया दौहेतुमतोद्रव्यादेर्विशिष्टद्रव्यत्वाद्यभावरूपप्रतियोग्यधिकरणेऽपिद्रव्यत्वाभावत्वावच्छिन्नायाप्रतियोगितातद्वच्छेद
कावच्छिन्नानधिकरणात्तूतस्यलक्षणघटकतेतिनातिव्याप्तिः कपिसंयोगाभाववान्आत्मत्वादिसादौचकपिसंयोगाभावत्वावच्छिन्नाया
प्रतियोगितातद्वच्छेदकावच्छिन्नाधिकरणमेवहेतुमत्किंतुगुणसामान्याभावत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमेव
तद्दनवच्छेदकमेवसाध्यतावच्छेदकमितिनाव्याप्तिरितिभावः नचैवंघटत्वावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणेधूमवत्
तादृशप्रतियोगितानवच्छेदकैववह्नितमित्याकारकस्याभावकूटावगाहिनःसमूहालेवनतानस्यैवानुमितिहेतुतयाविशिष्टपरामर्शस्यानु
मितिहेतुत्वमनुपपन्नेऽभावकूटघटितत्वयाव्याप्तिर्दुर्वारैवत्वापत्तिश्चेतिवाच्यंहेतुमन्निष्ठभेदप्रतियोगितायोस्वावच्छेदकावच्छिन्नवत्त्वसं
बंधेनावच्छेदिकायाप्रतियोगितातदनवच्छेदकत्वस्यएकसामान्याभावरूपस्यनिवेशोनात्पर्यात्तादृशभेदप्रतियोगितायोस्वावच्छेदका ॥३९॥
वच्छिन्नवत्त्वसंबंधेनानवच्छेदकत्वस्यसाध्यतावच्छेदकविशेषणतयैवसामंजस्येपियथासन्निवेशनवैयर्थ्यंतथाविधसंबंधेनतादृश

सिद्धा०

भेदप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्येन व्याप्तिरितिपुनरन्योन्याभावघटितलक्षणनिष्कृष्टार्थो बोध्यः संबंधसामान्येनहेतुमत्वनिवेशो व्याप्येवक्ष्यमाणलात् संबंधविशेषणहेतुमत्वप्रतियोगितायाः संबंधविशेषावच्छिन्नत्वानिवेशेनासंभवस्य वाच्यतया तत्र तत्र निवेशयति अत्रचेतियाद्य सामानाधिकरण्येअनुमितिकारणीभूतज्ञानविषयहेतुनिष्ठसाध्यसामानाधिकरण्यशरीरेसाध्यस्यचेति अत्रापियाद्य सामान्याधिकरण्यरूपप्रविष्टइतिचानुषज्यतेतथाचतत्संबंधेनहेतुप्रतिवर्त्ततियोऽभावस्तदीयतत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकोयोयोधर्मस्तदवच्छिन्नस्यतेनसाध्यतावच्छेदकसंबंधेनाधिकरणेतेनहेतुतावच्छेदकसंबंधेनवर्त्तमानत्वंतादृशसाध्यतावच्छेदकसंबंधेनसाध्यानुमितिप्रयोजकमित्यर्थः व्यापकताघटकसाध्यीयसंबंधेनसाध्याधिकरणेतादृशसाधनीयसंबंधेनसाधनीयस्यावर्त्तमानत्वंग्रहदशयांअनुमितिवारणायसामानाधिकरण्यशरीरे संबंधविशेषनिवेशनंवस्तुतस्तुविरुद्धत्वेनज्ञायमानधर्मवताज्ञानस्यानुमितावेवप्रतिबंधकतायावक्ष्यमाणतयासामानाधिकरण्यशरीरेसंबंधविशेषानिवेशेपिनक्षतिः सामानाधिकरण्यावगाहितायाःप्रयोजकत्वेचविशिष्टपरामर्शनिर्वाहायोपेपत्तेपर्वतीयधूमव्यापकोवन्हिरितिव्यापकतापरामर्शहेतुतायादूषितत्वात्नवस्तुव्यापकसाध्यकहेतुमानित्याकारकःसा

मानाधिकरण्यानवगाहि विशिष्टपरामृष्टएवहेतुरास्तामितिवाच्यंबहुव्रीह्यर्थस्यसामानाधिकरण्यपर्यवसितत्वादिस्वधर्मेयंप्रतियोगि
वैय्यधिकरण्यशरीरप्रतियोगितावच्छेदकसंबंधस्यानेसाध्यतावच्छेदकेसंबंधनिवेशनएवसाध्यतावच्छेदकसंबंधेनसाध्यवधेत्व
धिकरणनिष्टसंबंधांतरावच्छिन्नसाध्याभावमादायदूषणस्यापिनिराकरणसंभवेप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छि
न्नत्वनिवेशमनफलमित्याशयेनाहयद्वेत्यादितादात्म्यसंबंधेनव्यापकतानिर्वाहायप्रतियोग्यनधिकरणत्वमनुक्लाप्रतियोग्यसंबंधित्व
मपिहितेननुप्रतियोगिवैय्यधिकरण्येसंबंधित्वनिवेशेपितादात्म्यसंबंधेनव्याप्तिर्नानिर्वहतितादृशसाध्यतावच्छेदकसंबंधेनसाध्याधि
करणप्रसिद्ध्यातद्घटितसाध्यसामानाधिकरण्यस्याप्रसिद्धेरित्यतआहएवंस्थितेइतिप्रतियोगिवैय्यधिकरण्यशरीरसंबंधित्वनि
वेशेसतीत्यर्थःसंबंधित्वंनिवेशनीयमितितथाचसाध्यसामानाधिकरण्यंसाध्यसंबंधित्वंअभावस्यहेतुसामानाधिकरण्यमपिहे
तुसंबंधिसंबंधित्वंआदिनाग्राह्यंधर्मिणाधूमवद्दादेर्वन्हिमद्दादेश्चतदेवदर्शयतितथाहीतितादात्म्यसंबंधावच्छिन्नेतिपूर्वक
ल्याप्तिप्रायेणधूमवत्त्वंवन्हिमत्तोव्यर्थंमुक्ताधर्मिणेधूमवद्दादेर्वह्यादिरूपधर्मव्याप्यत्वंवन्हिमद्दादिरूपधर्मिणश्चधूमादिरूप
धर्मव्यापकत्वंनोहएवमितिअतएवतादात्म्यसंबंधेनव्याप्तिव्यवस्थापनादेवतत्रतत्रोक्तमेवपृथिवीत्वेनेतरभेदसाधनाये

सिद्धां॰
॥४०॥

यादिःसंगछतेइतिअन्यथाजलादीनांसंयोगादिनापृथिव्यादिवृत्तितयातेनसंबंधेनव्याप्तेर्जलादिभेदसाधनानुपयोगितयाचत
दुक्तंयसंगतेरितिभावःपृथिवीत्वाभावस्यस्वरूपसंबंधावछिन्नाभावेनपृथिवीत्वस्वरूपेणजलादिभेदःसिध्यतिनतुतस्यका
लिकसंबंधावछिन्नाभावेनेयत्रपृथिवीत्वेनव्याप्यस्यजलादेरन्योन्याभावएवसिद्ध्येतिनत्वेयंताभावरूपत्रवाकिंनियामक
मित्याशंक्यायंव्यतिरेकिणितत्संबंधघटितव्यापकत्वेनगृह्यमाणस्यतत्संबंधावछिन्नप्रतियोगिताकादेवाभावाद्धेतोर्येनसं
बंधेनेयस्यव्याप्यतागृहीतातत्संबंधावछिन्नप्रतियोगिताकएवतदभावःसिद्ध्यतीतिसमाधास्यन्अन्वयीनिव्याप्यताघट
कसंबंधेनव्याप्यवत्ताज्ञानात्व्यापकताघटकसंबंधेनैवव्यापकंसिद्ध्यतीतिनियमंदृष्टांतविधयादर्शयति।यथाचेति।तादृ
शेन।तादृशेनैवविशिष्टज्ञानेपक्षधर्मिकविशिष्टज्ञानेविशिष्टानुमितिःवैशिष्ट्यविषयकानुमितिःव्याप्यताघटकसंबंधेनैव
व्याप्यवत्ताज्ञानंहेतुरितिनियमस्यव्यापकताघटकेनैवसंबंधेनव्यापकस्यानुमितिरितिनियमस्यचक्रमेणप्रयोजनमाहतेने
तिअनवतीर्णबाधस्याभ्रांतस्येतिशेषःधूमावयवेनवह्निर्धारितःन्वयःतस्यसमवायेनवह्निव्याप्यधूमवत्वेपिव्याप्यताघट

केनसंयोगेनतद्वत्ताभावादितिभावःनवासमवायेनेतिपर्वतवृत्तिहेतुंप्रतिसमवायेनवह्नेर्व्यापकत्वादितिभावःप्रकृतोपयुक्त
नियमद्वयमाहतथैवेतिसंबंधेनसंबंधेनैवएतन्नियमद्वयस्यप्रयोजनांतरानुरोधेनाप्यावश्यकत्वमितिदर्शयतिकथमन्यथे
तिएतादृशनियमानभ्युपगमेनहेतिकथमुपपद्यतहत्यन्वयःमहानसेसंयोगेनधूमोननिवर्त्ततहत्यन्वयःमहानसधर्मिकसिद्धि
विषयसंयोगसंबंधावच्छिन्ननिवृत्तिप्रतियोगीनेत्यर्थःनिवर्त्ततेवधूमहत्यनुषज्यतेप्रकृतमाहतथाचेतिव्याप्यत्वग्रहात्स्वरूप
संबंधावच्छिन्नपृथिवीत्वाभावनिष्ठव्यापकतानिरूपितव्याप्यताग्रहात्व्यापकनिवृत्तिस्वरूपसंबंधावच्छिन्नप्रतियोगिताके
नेवपृथिवीत्वाभावाभावेनतेषांजलादीनांनन्वेतावतापिअन्योन्याभावसिद्धिःकथंनिराहतेत्यतआहसएवचेतिसवान्योन्याभा
वएवेतियोजनातादात्म्यसंबंधावच्छिन्नाभावश्चान्योन्याभावएवनात्रतादात्म्यंतादात्म्यसिद्धिरितिभावः
तादात्म्यसंबंधेनव्याप्यनभ्युपगमेकक्षतिःपृथिव्यांजलादिभेदसिद्धेर्जलादिभेदाभावव्यापकीभूताभावप्रतियोगित्वेन
पृथिवीत्वज्ञानादेवसंभवात्पृथिव्येकदेशेजलादिभेदप्रसिध्यातादृशव्याप्यग्रहसंभवस्यव्यर्थतेतिकेचिद्वक्ष्यमाणत्वान्नू

तदात्म्यसंबंधेन धर्मिणोऽनुमितेरप्यनुभवसिद्धत्वेधर्मितादात्म्यनिष्ठव्यापकताज्ञानस्येवतद्धेतुतायाःस्वीकरणीयत्वा
त्असतिप्रतिबंधकेत्तत्तादात्म्यादिविधेयकानुमितेत्मदात्म्यसंबंधेनतस्यविधेयत्वोपगमेक्षतिविरहादियतआहातए
वेतितादात्म्येनव्याप्तिस्वीकारादेवगोत्वव्याग्रहदशायांगौसिध्यतीत्यर्थःअन्यथातत्रगोत्वव्याप्यरूपसाध्यतावच्छेदकानुपस्थित्यागोत्व
साध्यकानुमितेरुपपत्तिकथासेदुर्ग्रहतयागोत्वसाध्यकानुमितेःतादात्म्यस्यापिगोत्वरूपतयातत्तन्निष्ठव्यापकतायाअपिगोत्वत्वोपस्थि
तिमंतरेणदुर्ग्रहतयातादात्म्यधर्मिकव्यापकताज्ञानाधीनतादात्म्यसंसर्गकगवानुमितेश्चासंभवेनायंगौरिसाकारकानुमितेरनुभ
वसिद्धायाअपलापप्रसंगादितिभावःयद्यपिगोत्वांशेगोत्वंधर्मितावच्छेदकीकृत्यव्यापकत्वावगाहिग्रहएवगोत्वेनगोसाध्य
कानुमितावपिहेतुर्वाच्यःनिर्दुर्मितावच्छेदककव्यापकतावच्छेदकत्वग्रहस्यव्यभिचारज्ञानाप्रतिबध्यतयाअनुमितिजनक
त्वादितितादात्म्येनगोत्वावच्छिन्नसाध्यकानुमितिरपिगोत्वानुपस्थितिदशायांनसंभवतितथापिवक्ष्यमाणप्रतियोगितावि

र्मिकऊभयाभावघटितलक्षणाभिप्रायेणेदमभिहितंतन्मतेस्वरूपतःसाध्यतावच्छेदकप्रकारिकायांअनुमितौस्वरूपतःसाध्यतावच्छेदकप्रकारकस्यसाधनवन्निष्ठाभावप्रतियोगित्वत्वावच्छेदेनसाध्यतावच्छेदकरूपावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभावावच्छिन्नाहिसाधनस्यहेतुतयातत्रगोत्वत्वतानानपेक्षेणानुपयोगभावात्तदुद्देश्ययुक्तयातादात्म्येनव्यापकतासिद्धिर्वतूगोत्वत्वाद्यग्रहदशायांयागोस्तत्रस्नादिरितियाप्तियहाधीनगवादिहेतुकास्नादिसिद्ध्यनुरोधात्तत्तत्संबंधेनव्याप्यतासिद्धिरपिदुष्टयाकेवितूतादात्म्यसंबंधेनव्यापकत्वानुपगमेपिगवान्यावृत्तित्वरूपव्यापिकाज्ञानात्गोत्वादिविधेयकानुमितिर्निष्प्रत्यूहैवतथास्तिअयंगौरियाकारकतापिअनुमितेर्निर्वहतिस्वरूपतोगोत्वावगाहिनोगवान्यावृत्तित्वज्ञानात्स्वरूपतएवगोत्वविषयिण्यास्तस्यासंभवात्तेनत्वानवच्छिन्नविधेयतायाअकृप्तातादात्म्यसंबंधेनगोरेवविधेयत्वमुचितंअयंगौरियादिवाक्यजन्यबोधेतादात्म्यसंबंधावच्छिन्नगवादिविधेयतायाःकृप्तत्वादितिवाच्यंअयंगौरियाकारकेदंतावच्छिन्नविशेष्यकगोत्वादिप्रकारकप्रत्यक्षेयोगोत्वादिप्रकारकप्रत्यक्षेयागोत्वादिप्रकारतातस्यएवविधेयतात्वोपगमेअनुमितौतत्कल्पनेतिरिक्तविधेयताकल्पनाभा

वात्अस्तुवागवान्यावृत्तित्वरूपव्याप्तिज्ञानादेवतादात्म्येनगवानुमितिःकिंतादात्म्येनव्यापकतेयंशंकानिरावित्कीर्षयोक्तंगोत्वव्या
ग्यग्रहदशायामितिगवेतरावृत्तित्वस्यहेतुभूतसास्नादावग्यग्रहदशायामिप्याहुःतत्रगवेरावृत्तित्वमात्रस्यगोत्वशब्दार्थतावि्रहेण
उदक्षरतायादुर्वारत्वात्गोत्वपदंतद्वृत्तिधर्मपरमितितुनसम्यक्गोत्वस्यविशिष्टगोवृत्तित्वरूपस्यस्वरूपतोभानासंभवेनत
ज्ज्ञानदशायांतद्वृत्तिधर्मभानस्यावश्यकत्वात्अपरेतुगोत्वलाग्यग्रहदशायामपिगौः सिद्धुतीयन्वयःयदागोत्वमनुमितौनभास
तेतदापितत्रगौर्भासतेइत्यर्थःस्वरूपतोगोत्वादिप्रकारिकागवाद्यनुमितिर्भवतीतियावत्तादात्म्येनव्यापकतानुपगमेगोत्वस्ये
वसास्नादिलिंगकानुमितौभानस्योपगंतव्यतयाविधेयतायाश्चावच्छेदकनियमेनस्वरूपतोगोत्वप्रकारकानुमितेरनुभवसिद्धायव्यनुपप
त्तिरितिउपदंभमात्रंगतिरितिप्राहुःयतुअनवच्छेदकगोतादात्म्यसंबंधेनस्वरूपतःसाध्यतावच्छेदकप्रकारकज्ञानादनवच्छेदकत्वांशआ
धेयतासंबंधेनस्वरूपतस्तत्प्रकारकज्ञानाद्वास्वरूपतस्तत्प्रकारकानुमितिरितिउपगमिनगोत्वलाग्यग्रहदशायामपितादात्म्येनव्यापकता
ज्ञानादनुमितिर्निर्वहतीतिनोक्तानुपपत्तिरितितदसत्अयंगौरितिसादिज्ञानानुभवसोयस्वरूपतोगोत्वादिविशेषितप्रकारिता-

प्रकारेणज्ञानभानात्समवायातिरिक्तेननिरूपितत्वसंबंधेनगोत्वादेःस्वरूपतःप्रकारतायाआवश्यकत्वेपिसमवायातिरिक्तेनपरसंबंधेनस्वरूपतःप्रकारतायाअप्रमाणिकत्वात्तूअन्यथाव्यापकताज्ञानहेतुतामतेस्वरूपतोज्ञानत्वादेर्विधेयतावच्छेदकत्वानुपपत्तेःकेवलान्वयिग्रंथेतज्ज्ञानस्यानुमितिहेतुतायांखंडनेदीधितिकृतोविरुद्धेतउक्तक्रमेणैवतन्निर्वाहात्तूनवतथासतिप्रतियोगिताधर्मिकोभयाभावघटितलक्षणाभिप्रायकतयापिनेतद्ग्रंथसंगतिरितिवाच्यंप्रकारित्वांशइवावच्छेद्यत्वांशेपिनिरूपितत्वसंबंधेनज्ञातेःस्वरूपतःप्रकारित्वाभिप्रायेणैतद्ग्रंथसंगमनात्तूतस्याप्रामाणिकत्वाभिप्रायेणाग्निमव्यापकताज्ञानहेतुतायांखंडनसंगतेःअपरेतुगोत्वत्वाद्यग्रहदशायामपिस्वरूपतोभासमानगोत्वावच्छिन्नेहेतुमन्निष्ठभेदप्रतियोगितानिरूपिततादात्म्यसंबंधावच्छिन्नावच्छेदकत्वाभावरूपान्योन्याभावघटिततादात्म्यसंबंधावच्छिन्नव्यापकताज्ञानात्तादात्म्येनस्वरूपतोगोत्वप्रकारिकानुमितिःसंभवत्येव ।एकरूपेणावच्छेदकेपिअवच्छेदकतानवच्छेदकरूपेणावच्छेदकत्वाभावंस्वीकृत्येवान्योन्याभावघटितलक्षणस्यग्रंथकृतायसिद्धां॰ ॥४३॥

द्रूपावच्छिन्नमित्यादिनापरिकूरणीयत्वात्तदभिप्रायेणैवैतत्संगतेः केवलान्वयिग्रंथेष्वप्रतियोगि
तानवच्छेदकरूपेणतत्वाभावस्यैवावच्छेदकतानवच्छेदकरूपेणावच्छेदकत्वाभावस्याप्रामाणिकतयाव्यापकताज्ञा
नेसाध्यतावच्छेदकस्यस्वरूपतोज्ञानेनसंभवतीयभिप्रायेणव्यापकताज्ञानहेतुतामतेस्वरूपतोज्ञानतप्रकारका
नुमित्यनुपपत्तेर्वक्ष्यमाणतयानपूर्वापर्यंथविरोधइतिप्राहुःतादात्म्येनगोन्यतिरेकादिति।तादात्म्यसंबंधावच्छि
न्नप्रतियोगिताकात्तादात्म्यसंबंधघटितव्यापकतावच्छेदकतावच्छेदकगोतावच्छिन्नस्यभेदरूपाभावादित्यर्थः।
समवायसंबंधावच्छिन्नाभावस्यसाधकतेपितत्प्रतियोगितावच्छेदकगोत्वतावग्रहदशायांतद्भावस्यज्ञानासंभ
वेनततःसास्नाभावसिद्ध्यसंभवादितिभावःएवंवाधिकरणत्वस्थानेसंबंधितानिवेशेवगगनादेरपीतितस्या
धिकरणाप्रसिद्धावपिसंयोगेनतत्संबंधिवृत्तित्वस्याभावेतत्रचसाध्यवत्संबंधित्वस्यप्रसिध्यायथोक्तव्या

पिसत्वादितिभावः।वृत्तिनियामकसंयोगव्यावृत्तरूपेणसंयोगस्याभावप्रतियोगितावच्छेदकसंबंधत्वेनसाध्यता
वच्छेदकसंबंधस्यगगनीयसंयोगस्याभावप्रतियोगितानवच्छेदकतयाप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छि
न्नत्वनिवेशकल्पेतथाविधप्रतियोगितायाप्रसिध्यासंयोगेनगगनस्यनव्यापकतानिर्वहतीयतउक्तंवृत्तिनियामकसंयोग
मात्रस्येतितादृशसंयोगसाधारणसंयोगत्वावच्छिन्नस्येत्यर्थःयेद्धेसायुक्तकल्पेवृत्तिनियामकसंयोगसाधारणरूपेणता
दृशसंबंधत्वविरहेपिनक्षतिस्तन्मतेप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वानिवेशादिसाशयेनाहसाध्य
तावच्छेदकसंबंधेनेतिपृथिवीत्वादिव्यापकत्वमपियत्रसंयोगेनगगनादेरियनुषज्यतेननुप्रतियोगितायासाध्यता
वच्छेदकसंबंधावच्छिन्नत्वानिवेशेपृथिव्यादिनिष्ठसमयादिसंबंधावच्छिन्नाभावप्रतियोगितयागगनादेर्नपृथि
वीत्वादिव्यापकतासंभवइतआहतदभाववतोथितिसमवायादिनागगनाद्यभाववतोपीत्यर्थःतत्संबंधिता
त्वगगनादिसंबंधित्वान्नतथात्वतादृशगगनाद्यभावोनसाध्यतावच्छेदकसंबंधेनप्रतियोग्यसंबंधिहेतुमन्निष

इत्यभावांतरमादायलक्षणसत्वंनिष्प्रत्यूहमेवेतिभावः ननुसंयोगेनगगनस्यव्यापकत्वेबाधानवतारद्दशायांअभ्रांतस्य
वृत्तिनियामकसंयोगेनैवकथंनगगनानुमितिरित्यतआहसिद्धिरपीतितथैववृत्तिनियामकसंयोगेनैवतेनासंबंधित्वादि
तथाचतत्संबंधावगाहेऽनुमितेर्भ्रमतयातत्रभ्रमत्वंकपरामर्शस्यापेक्षितंत्वादितिभावःयद्रूपावच्छिन्नसंबंधस्य
व्यापकताघटकत्वंतद्रूपावच्छिन्नतत्संबंधेनैवानुमितिरितिनियमाप्रियेणदोषांतरमाहअव्योपकत्वाच्चेतिवृत्तिनिया
मकेनसंबंधेनैवगगनाद्यभावस्यप्रतियोगिसमानाधिकरणतयावृत्तिनियामकसंयोगेनप्रतियोगिव्यधिकरणाभावप्रति
योगितायागगनेसत्वेनतत्संबंधस्यव्यापकत्वाघटकत्वादित्यर्थःतथाचव्यापकत्वाघटकसंबंधस्यानुमितावभानात्ननतेना
नुमितिप्रसंगइतिभावःननुवृत्तिनियामकसंयोगेनगगनादिसंबंधिनोऽप्रसिध्याकथंतेनसंबंधेनगगनाद्यभाव
स्यप्रतियोगिवैय्यधिकरण्यमितिचेदाहचक्रीभविष्यतीतिवक्ष्यमाणोभयाभावघटितप्रतियोगिवैय्यधिकरण्यंतत्रा
पिसुलभमितिभावः कालिकविशेषणतयाघटादिसाध्यकेमहाकालत्वादिहेतौअप्रसिद्धिर्निबंधनाव्याप्तिंशंकतेननि

यागिनाखंडकालवृत्तेतनुकालत्वादिहेतुकस्यलेऽतीतानागतव्यक्तीनांतत्तद्व्यक्तित्वावच्छिन्नता-
भावएवहेतुमतिप्रतियोगिव्यधिकरणःप्रसिद्ध इतिनाव्याप्तिरितीऽष्टद्रव्यातिरिक्तद्रव्यात्मकेतिजन्यमात्रस्यकालोपाधिता
मतेद्रव्यात्मकस्यापिखंडकालस्यसंभवान्नमहाकालपर्यंतलाभइत्यतोऽतिरिक्तोतंयद्यपिगगनदिगात्ममनसांनित्य
तयाखंडकालत्वासंभवेनचतुर्द्रव्यातिरिक्तेमुक्तावपिमहाकालत्वलाभस्तथापियत्किंचिच्चतुर्द्रव्यातिरिक्तत्वस्य पृथिव्यो
दावपिसत्वात्पृथिव्यादिचतुष्टयातिरिक्तत्वस्यविशिष्याभिधानएवतत्तत्वाभः तोत्रिकेमहाकालस्यैवाष्टद्रव्याति
रिक्तद्रव्यपदेनाभिधानात्तथाभिधानेपिनान्योन्याश्रयशंकेतितथैवाभिहितं तेखंडकालसाधारणमहाकालवृत्तेर्हेतु-
त्वेखंडकालरूपहेत्वधिकरणएवलक्षणघटकोकालभावप्रसिद्धिरितिकालमात्रवृत्तिसत्तामात्रपदेसमवायादिनाकस्य
चित्साध्यत्वेसमवायादिनाघटत्वभावएवमहाकालेतेनसंबंधेनप्रतियोगिव्यधिकरणःप्रसिध्यतीत्यतोविशेषणतावि
शेषणेतिकालिकविशेषणतयेत्यर्थः व्याप्यवृत्तिर्यत्साध्यकेप्रतियोगिवैयधिकरण्यानुपादानेनकेवलान्वयिनिस

वाच्यत्वादेर्व्यापकतासंभवरूपतोऽव्याप्यवृत्तीति कालिकसंबंधेना व्याप्यवृत्तित्वं व्यतिरेकिमात्रस्यैव केवलान्वयिनोऽप्यनित्यस्य विश्वविषयकजन्यज्ञानविषयत्वादेर्बोध्यं एतत्सर्वं चास्त्वव्याप्यमिप्रायेणाभिहितेऽन्यवृत्तिहेतुकेन्यसंबंधेनसाध्यतायां वह्नेतुमतिसर्वत्रसाध्यतावच्छेदकसंबंधेनवृत्तिमन्मात्रस्यैवतेनसंबंधेनवृत्तित्वभ्रमदशायांअनुमितिजनकज्ञानानुपपत्तिरप्यदृष्टव्याएवंकालिकसंबंधेनव्याप्यवृत्तिसाध्येऽपिसाध्यस्यहेतुमतितेनसंबंधेनाव्याप्यवृत्तित्वभ्रमदशायांप्रतियोगिवैय्यधिकरण्याघटितायाः प्रतियोगिवैय्यधिकरण्यघटितायाश्चव्यापकतायादुर्ग्रहत्वान्महाकालत्वादिहेतुकानुमितेरनुपपत्तिरप्यिस्वावच्छेदकसंबंधेनस्वावच्छेदकविशिष्टानधिकरणहेत्वधिकरणवृत्यभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेशकल्पेनादृशप्रतियोगित्वप्रसिद्ध्युक्तिघानेनाव्याप्तिं स्फुटीकरोतिस्वावच्छेदकेतिस्वंप्रतियोगिता कालेमहाकालेतत्संबंधावच्छिन्नत्वस्यकालिकसंबंधावच्छिन्नत्वअसंभवादितिमो

जनाकालिकसंबंधेनवृत्तिमन्मात्रस्येवमहाकालेवृत्तिरवृत्तेश्चतेनसंबंधेनसंबंधिनोऽप्रसिध्याकाशापिकालि
कसंबंधावच्छिन्नाभावप्रतियोगितावच्छेदकसंबंधेनप्रतियोग्यसंबंधिदेतुमद्वृत्तित्वासंभवेनसमवायादिसंबंधाव
च्छिन्नघटाद्यभावस्यघटात्वात्तत्प्रतियोगितायाश्चसमवायादिसंबंधेनैवावच्छिन्नत्वादितिभावः साध्यतावच्छेदक
संबंधेनप्रतियोग्यसंबंधिदेतुमद्वृत्यभावीयसंबंधावच्छिन्नत्वाविवक्षितप्रतियोगितानिवेशकल्पेतादृशसंबंधे
नप्रतियोगिसंबंधिहेतुमतएवाप्रसिध्याव्याप्तिरित्याहतेनेतितेनसंबंधेनगगनाद्यभावप्रतियोगिनस्तेनसंबंधे
नसबंधिरूपप्रतियोग्यप्रसिध्यातेनसंबंधेनप्रतियोग्यसंबंधित्वासिद्धेस्फुटीकर्तुप्रतियोग्यसंबंधित्वस्येयनमि
धावयत्प्रतियोगिसंबंधितदन्यत्वस्येससमासेनाभिधानं।अथकालिकसंबंधेनमहाकालान्यवृत्तित्वविशिष्टस्यत्त
त्संबंधावच्छिन्नभावएवमहाकालेप्रतियोगितावच्छेदकविशिष्टप्रतियोगित्वाधिकरणःप्रसिद्धस्तमादायैवचलक्षणस

मन्वयात्कथमव्याप्त्यभिधानं नहिमहाकालान्यवृत्तित्वविशिष्टघटादि निरूपितःकालिकसंबंधोमहाकाले संभवतितद्धर्मिवृत्तित्वविशिष्टनिरूपितसंभवानुयोगितायास्तद्धर्मिनियतत्वात्तूक्तव्यधासत्वादिमतिगुणदोद्रव्यादिवृत्तित्वविशिष्टसत्ताद्यभावप्रत्ययानुपपत्तेःनचैवंदादिहवृत्तित्वविशिष्टवन्ह्यभावादेर्विषयितयासंबंधित्वेज्ञानेतत्स्यात्तज्ज्ञानस्यहृदादिवृत्तित्वानिरूपकत्वात्तूरतिहृदोवन्हिमानिया दौतादृशविशिष्टस्यबोधादिरूपस्यहेत्वाभासत्वनस्यात्तज्ज्ञाननिष्ठविषयितयायादृशविशिष्टवत्वमनुमितिप्रतिबंधकतावच्छेदकतादृशविशिष्टस्यैवतथात्वात्तूयद्दिचतत्संबंधेनतद्धर्मिसंबंधित्वविशिष्टनिरूपितस्तादृशसंबंधोविशेषणकोटिप्रविष्टतद्धर्मिनियतवृत्तिसंबंधांतरेणहृदादिवृत्तित्वविशिष्टनिरूपितविषयितासंबंधोज्ञानेसंभवस्येवेत्युच्यतेतदापिहृदादिविषयत्वविशिष्टघटादि निरूपितविषयितासंबंधस्यज्ञानेऽसंभवादिछाविषयत्वाभावादिसाध्यकघटादिपक्षकस्थलेतादृशविशिष्टस्यबाधादिरूपस्यहेत्वाभासत्वानुपपत्तिर्दुवारेवेतिवाच्यं विशिष्टनिरूपितविष-

५९शिं० टिं०
गदा०
॥४७॥

यितातिरिक्तसंबंधस्यैवविशेषणीभूतसंबंधितानिरूपकाधिकरणत्वनियंत्तत्वोपगमात्तदुर्मविशिष्टत्वनिरूपितविषयितायांतदं
शेत्तदुर्मप्रकारकत्वमात्रस्योपेक्षितत्वादिछाविषयोघटइत्यादिस्तोने इछाविषयत्वविशिष्टघटादि निरूपितविषयितासत्वेबाधका
भावात्तूनत्वमहाकालेमहाकालान्यवृत्तित्वविशिष्टघटाद्यधिकरणत्वानुपगमेविश्वाधारत्वव्याघातइतिशंकनीयंतादृशविशिष्ट
निरूपिताधिकरणताविशेषस्यमहाकालेऽसत्वेपिघटादेर्घटत्वाद्यवछिन्ननिरूपिताधिकरणतासत्वेनैवसर्वाधारत्वोपपत्तेःअ
न्यकेवितूकालिकसंबंधेनाधारतामहाकालस्यैवनतुसूर्य्यक्रियादेःइदानींघटइदानींपटइत्यादिप्रतीत्याक्रियादिरूपकालो
पाधीनांमहाकालनिष्ठाधारतावछेदकत्वस्यैवावगाहनात्अतएवतेषांकालविशेषणतयाकालोपाधित्वप्रवादः।तादृशप्रती-
त्याक्रियादावेवघटाद्याधारत्वावगाहित्वोपगमेतादृशप्रतीतीनामनुगताधारतावगाहित्वानुभवविरोधात्कालत्वेनासर्वोपा
धिनासर्वक्रियादीनामनुगमेनतादृशानुभवोपपादनेमहाकालस्यैवाप्रामाणिकतापत्तेरितिप्राचीनमतान्निप्रायेणेयमव्याख्याशं
कातथाचसतिकालिकसंबंधेनमहाकालान्यवृत्तित्वस्यैवाप्रसिध्यातद्विशिष्टघटाद्यभावमादायलक्षणगमनासंभवात्तूनत्वक्रि

सिध्दी

॥४७॥